तत्र वापीं तां मृतसञ्जीवनीं प्रभो ! । येन रूपेण दैत्यास्तु येन योगेन चैव ह । मृतास्तस्यां परिक्षिप्तास्तादृशेनैव जज्ञिरे । तां प्राप्य ते पुनस्तांस्तु सर्वान् लोकान् बबाधिरे । महता तपसा सिद्धाः सुराणां भयवर्द्धनाः । न तेषामभवद्राजन् क्षयो युद्धे कथञ्चन" । "संगीयमानस्त्रिपुरावदानः" कुमा० । "गङ्गेव त्रिपुरद्विषः" रघुः "त्रिपुरदाहसमापतिसेविनः" किरा० । त्रीणि पुराणि येषाम् । २तारकाक्षसुतहस्त्यादिषु असुरभेदे पु०ब०व० । त्रीन् धर्म्मार्थकामान् पिपर्त्ति पॄ—क । ३देवीभेदे स्त्री । "वैष्णव्याः मन्त्रमुख्येषु त्रिपुरायास्ततः शृणु" तन्त्रसारः । "शृणु त्वं त्रिपुरामूर्त्तेः कामाख्यायास्तु पूजनम्" कालिकापु० ६२ अ० । शतदिनगम्यां त्रिपुराख्यदेशभेदे स्त्री ङीप् हेमच० ।

**त्रिपुरघ्न** पु० त्रिपुरं हन्ति हन—टक् । १महादेवे तस्य त्रिपुरहननकथा भा० क० २४ अ० ।

"मूर्त्तिं सर्वां समाधाय त्रैलोक्यस्य ततस्ततः । रथं ते कल्पयिष्यामो देवेश्वर ! महौजसम् । तथैव बुद्ध्या विहितं विश्वकर्म्मकृतं महत् । ततो विबुधशार्दूलास्तं रथं समकल्पयन् । विष्णुं सोमं हुताशञ्च तस्येषुं समकल्पयन् । शृङ्गमग्निर्बभूवास्य भल्लः सोमो विशाम्पते ! । कुड्मलञ्चाभवद्विष्णुस्तस्मिन्निषुवरे तदा । बन्धुरं पृथिवीं देवीं विशालपुरमालिनीम् । सपर्वतवनद्वीपां चक्रुर्भूतधरां तदा । मन्दरः पर्वतश्चाक्षं जङ्घा तस्य महानदी । दिशश्च प्रदिशश्चैव परिवारो रथस्य ह । ईषा नक्षत्रवंशश्च युगः कृतयुगोऽभवत् । कूबरश्च रथस्यासीद्वासुकिर्भुजगोत्तमः । अपस्करमधिष्ठानं हिमवान् विन्ध्यपर्वतः । उदयास्तावधिष्ठाने गिरी चक्रुः सुरोत्तमाः । समुद्रमक्षमसृजन् दानवालयमुत्तमम् । सप्तर्षिमण्डलञ्चैव रथस्यासीत् परिष्करः । गङ्गा सरस्वती सिन्धुर्धुरमाकाशमेव च । उपस्करो रथस्यासन्नापः सर्वाश्च निम्नगाः । अहोरात्राः कलाश्चैव काष्ठाश्च ऋतवस्तथा । अनुकर्षं ग्रहा दीप्ता वरूथञ्चापि तारकाः । धर्म्मार्थकामसंयुक्तं त्रिवेणुं दारुबन्धनम् । ओषधीर्वीरुधस्तत्र नानापुष्पफलोपगाः । सूर्य्याचन्द्रमसौ कृत्वा चक्रे रथवरोत्तमे । पक्षौ पूर्वापरौ तत्र कृते रात्र्यहनी शुभे । दश नागपतीनीषां धृतराष्ट्रमुखान् दृढान् । द्यां युगं युगचर्म्माणि संवर्त्तकबलाहकान् । सन्ध्यां धृतिञ्च मेधाञ्च स्थितिं सन्नतिमेव च । ग्रहनक्षत्रताराभिश्चर्म्म चित्रं नभस्तलम् । सुराम्बुप्रेतवित्तानां पतीन् लोकेश्वरान् हयान् । कालपृष्ठोऽथ नहुषः कर्कोटकधनञ्जयौ । इतरे चाभवन्नागा हयानां बालबन्धनाः । दिशश्च प्रदिशश्चैव रश्मयो रथवाजिनाम् । वषट्कारः प्रतोदोऽभूत् गायत्री शीर्षबन्धनी । सिनीवालीमनुमतिं कुहूं राकाञ्च सुव्रताम् । योक्त्राणि चक्रुर्वाहानां रोहकांस्तत्र कण्टकान् । कर्म्म सत्यं तपोऽर्थश्च विहितास्तत्र रश्मयः । अधिष्ठानं मनश्चासीत् परिरथ्या सरस्वती । नानावर्णाश्च चित्राश्च पताकाः पवनेरिताः । विद्युदिन्द्रधनुर्नद्धं रथं दीप्तं व्यदीपयन् । यो यज्ञे विहितः पूर्वमीशानस्य महात्मनः । संवत्सरो धनुस्तद्वै सावित्री ज्या महास्वना । दिव्यञ्च वर्म्म विहितं महार्हरत्नभूषितम् । अभेद्यं विरजस्कं वै कालचक्रबहिष्कृतम् । ध्वजयष्टिरभून्मेरुः श्रीमान् कनकपर्वतः । पताकाश्चाभवन्मेघास्तडिद्भिः समलङ्कृताः । रेजुरध्वर्युमध्यस्था ज्वलन्त इव पावकाः । कॢप्तन्तु तं रथं दृष्ट्वा विस्मिता देवताभवन् । सर्वलोकस्य तेजांसि दृष्ट्वैकस्थानि मारिष ! । युक्तं निवेदयामासुर्देवास्तस्मै महात्मने । एवं तस्मिन् महाराज ! कल्पिते रथसत्तमे । देवैर्म्मनुजशार्दूल ! द्विषतामभिमर्द्दने । स्वान्यायुधानि दिव्यानि न्यदधात् शङ्करो रथे । ध्वजयष्टिं वियत् कृत्वा स्थापयामास गोवृषम् । ब्रह्मदण्डः कालदण्डो रुद्रदण्डस्तथा ज्वरः । परिष्कन्दा रथस्यासन् सर्वतोदिशमुद्यताः । अथर्वाङ्गिरसावास्तां चक्ररक्षौ महात्मनः । ऋग्वेदः सामवेदश्च पुराणञ्च पुरःसराः । इतिहासधनुर्वेदौ पृष्ठरक्षौ बभूवतुः । दिव्या वाचश्च दिव्याश्च परिपार्श्वचराः स्थिताः । स्तोत्रादयश्च राजेन्द्र ! वषट्कारस्तथैव च । ओँकारश्च मुखे राजन्नति शोभाकरोऽभवत् । विचित्रमृतुभिः षड्भिः कृत्वा संवत्सरं धनुः । छायामेवात्मनश्चक्रे धनुर्ज्यामक्षयां रणे । कालो हि भगवान् रुद्रस्तस्य संवत्सरो धनुः । तस्माद्रौद्री कालरात्रिर्ज्यां कृत्वा धनुषोऽजराम् । इषुश्चाप्यभवद्विष्णुर्ज्वलनः सोम एव च । अग्नीषोमं जगत् कृत्स्नं वैष्णवञ्चोच्यते जगत् । विष्णुश्चात्मा भगवतो भवस्यामिततेजसः । तस्माद्धनुर्ज्यासंस्पर्शं न विषेहुर्हरस्य ते । तस्मिन् शरे तिग्ममन्युर्मोचाविषहं प्रभुः । भृग्वङ्गिरोमन्युभवं क्रोधाग्निमतिदुःसहम् । स नीललोहितो धूम्रः कृत्तिवासा भयङ्करः । आदित्यायुतसङ्काशस्तेजो-